क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः । विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः” । सा० द० क्रमेण यथा । “तव विरहे मलयमरुद्दावानलः शशिरुचोऽपि सोष्माणः । हृदयमलिरुतमपि भिन्ते नलिनीदलमपि निदाघरविरस्याः” । “सन्ततमुसलासङ्गाद्बहुतरगृहकर्म्मघटनया नृपते । द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः” । “अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः । स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव” । “वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः । राकाविभावरीजानिर्विषज्वालाकुलोऽभवत्” । “नयनयुगासेचनकं मानसवृत्त्यापि दुष्प्रापम् । रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे” । “त्वद्वाजिराजीत्यादि” “वल्लभोत्सङ्गेनेत्यादि” श्लोके चतुर्थपादे “मध्यन्दिनदिनाधिप” इति पाठे द्रव्ययोर्विरोधः । अत्र “तव विरह” इत्यादौ पवनादीनां बहुव्यक्तिवाचकत्वाज्जातिशब्दानां दावानलोष्णहृदयभेदनरूपैर्जातिगुणक्रियाद्रव्यरूपैरन्योन्यं विरोधो मुखत आभासते । विरहहेतुकत्वेन समाधानम् । अजस्येत्यादौ अजत्वादिगुणस्य जन्मग्रहणादिक्रियाविरोधः । भगवतः प्रभावस्यातिशयितत्वात्तु समाधानम् । “त्वद्वाजीत्यादौ” “हरोऽपि शिरसा गङ्गां न धत्ते” इति विरोधः । “त्वद्वाजीत्यादिकविप्रौढोक्त्या तु समाधानम् । स्पष्टमन्यत् । विभावनायां कारणाभावेनोपनिबध्यमानत्वात् कार्य्यमेव बाध्यत्वेन प्रतीयते । विशेषोक्तौ च कार्य्याभावेन कारणमेव । इह त्वन्योन्यं द्वयोरपि बाध्यत्वमिति भेदः ।

१०१ विरोधाभासः । “आभासत्वं विरोधस्य विरोधाभास इष्यते” चन्द्रा० “अमित्रजिन्मित्रजिदोजसा स यत् विचारदृक्चारदृगप्यवर्त्तत” नैषधम् ।

१०२ विवृतोक्तिः “विवृतोक्तिः श्लेषगुप्तं कविनाविष्कृतं यदि” च० । “वृषापेहि परक्षेत्रादिति वक्ति ससूचनम्” ।

१०३ विशेषः “यदाधेयमनाधारमेकञ्चानेकगोचरम् । किञ्चित् प्रकुर्व्वतः कार्य्यमशक्यस्येतरस्य वा । कार्य्यस्याकरणं दैवाद्विशेषस्त्रिविधस्ततः” । सा० द० क्रमेण यथा । “दिवमप्युपयातानामाकल्पगुणगणा येषाम् । रमयन्ति जगन्ति गिरः कथमपि कवयो न ते वन्द्याः” । ‘कानने सरिदुद्देशे गिरीणामपि कन्दरे । पश्यन्त्यन्तकसङ्काशं त्वामेकं रिपवः पुरः” । “गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ । करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्?” ।

१०४ विशेषोक्तिः “सति हेतौ फलाभावो विशेषोक्तिस्तथा द्विधा” सा० द० । तथेत्युक्तानुक्तनिमित्तत्वात् । तत्रोक्तनिमित्ता यथा । “धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः । प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः” अत्र महामहिमशालित्वं निमित्तमुक्तम् । अत्रैव चतुर्थपादे “कियन्तः सन्ति भूतले” इति पाठे त्वनुक्तम् । अचिन्त्यनिमित्तत्वं च अनुक्तनिमित्तस्यैव भेद इति पृथग्नोक्तम् यथा “स एकस्त्रीणि जयति जगन्ति कुसुमायुधः । हरतापि तनुं यस्य शम्भुना न हृतं बलम्” । अत्र तनुहरणेऽपि बलाहरणे निमित्तमचिन्त्यम् । इह च कार्य्याभावः कार्य्यविरुद्धसद्भावमुखेनापि सा० द० ।

१०५ विषमम् । ‘गुणौ क्रिये वा यत् स्यातां विरुद्धे हेतुकार्य्ययोः । यद्वाऽऽरब्धस्य वैफल्यमनर्थस्य च सम्भवः । विरूपयोः सङ्घटना या च तद्विषमं मतम्” । सा० द० क्रमेण यथा । “सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा । तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोकाभरणं प्रसूते” । अत्र कारणरूपासिलतायाः “कारणगुणा हि कार्य्यगुणमारभन्ते” इति स्थितेर्विरुद्धा शुक्लयशस उत्पत्तिः । “आनन्दममन्दमिमं कुवलयदललोचने ! ददासि त्वम् । विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे” । अत्रानन्दजनकस्त्रीरूपकारणात्तापजनकविरहोत्पत्तिः । ‘अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया । धनं दूरेऽस्तु वदनमपूरि क्षारवारिभिः” । अत्र केवलं काङ्क्षितधनलाभो नाभूत् प्रत्युत क्षारवारिभिर्वदनपूरणम् । “क्व वनं तरुवल्कभूषणं नृपलक्ष्मीः क्व महेन्द्रवन्दिता । नियतं प्रतिकूलवर्त्तिनो बत धातुश्चरितं सुदुःसहम्” । अत्र वनराजश्रियोर्विरूपयोः सङ्घटना ।

१०६ विषादनम् “इष्यमाणविरुद्धार्थसंप्राप्तिश्च विषादनम्” च० । “दीपमुद्दीपयेद्यावत्तावन्निर्व्वाण एव सः” ।

१०७ व्यतिरेकः “आधिक्यमुपमेयस्योपमानान्न्यूनताथवा । व्यतिरेक एक उक्ते हेतौ नोक्ते स च त्रिधा ॥ चतुर्विधोऽपि साम्यस्य बोधनाच्छब्दतोऽर्थतः । आक्षेपाच्च द्वादशधा श्लेषेऽपीति त्रिरष्टधा । प्रत्येकं स्यान्मिलित्वाष्टचत्वारिंशद्विधः पुनः” ॥ सा० द० उपमेयस्योपमानादाधिक्ये हेतुरुपमेयगतमुत्कर्षकारणमुपमानगतं निकर्षकारणञ्च । तयोर्द्वयोरप्युक्तावेकः” प्रत्येकं समुदायेन वानुक्तौ त्रिविध इति चतुर्विधोऽप्ययमुपमानोपमेयस्य निवेदनं शब्देनार्थेनाक्षेपेण चेति द्वादशप्रकारोऽपि श्लेषेऽपि-